जटाधरः ॥ स्थूनः ५ स्रोतः ६। इति भरतधृतकोषान्तरम् ॥

धौतकोषजं, क्ली, (कोषाज्जायते इति। कोष+जन+डः। धौतं कोषजम्।) पत्रोर्णम्। इति शब्दरत्नावली ॥

धौतकौषि(शे)यं, क्ली, (धौतं क्षालितं कौषेयम्।) पत्रोर्णम्। इत्यमरः। २। ६। ११३॥ कौषेयमेव धौतं प्रक्षालितं पत्रोर्णाख्यं वटलकुचादिपत्रेषु क्रिमिभिरूर्णायाः कृतत्वात् पत्रसम्बन्धिनी ऊर्णा अत्रेति पत्रोर्णम्। इति भरतः ॥

धौतशिलं, क्ली, (धौतेव शिला यस्य।) स्फाटिकम्। इति त्रिकाण्डशेषः ॥

धौमकः, पुं, (धूमे धूमप्रधानदेशे भवः। धूम+"धूमादिभ्यश्च।" ४।२।१२७। इति वुञ्।) देशविशेषः। इति केचित् ॥

धौरः, पुं, धवहक्षः। इति भावप्रकाशः ॥

धौरितकं, क्ली, (धोरितक+प्रज्ञादित्वादण्।) अश्वानां पञ्चविधगत्यन्तर्गतगतिविशेषः। इत्यमरः। २। ८। ४८॥ तत्र बभ्रुक् भीतरास्कन्दितं नाम इति ख्यातं तस्मेऽधिका चतुरा गतिः। इति भरतः ॥

धौरेयः, त्रि, (धुरं वहतीति। "धुरो यड्ढकौ।" ४। ४। ७७। इति ढक्।) रथशकटादिभारवोढ़ा। इत्यमरः। २।८।६५॥ अनडुहि, पुं। इति राजनिर्घण्टः ॥

धौर्त्तिकं, त्रि, धूर्त्तस्येदम्। धूर्त्तस्य भावः। इति धूर्त्तशब्दात् ष्णिकप्रत्ययेन निष्पन्नम् ॥

धौर्य्यं, क्ली, (धुर्य्यस्य कर्म्म। धुर्य्य+ष्यञ्।) अश्वस्य प्रथमगतिः। इति हेमचन्द्रः। ४। ३१२॥

ध्मा, अग्निसंयुतौ। ध्वनौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-अनिट्।) युतिरिति धातुव्यात्र दीर्घः। अग्नियुतिरग्निसंयोगः। ध्वनिः शब्दोत्पत्तिहेतुभावः। धमति सुवर्णं वणिक् अग्निसंयुक्तं करोतीत्यर्थः। धमति शङ्खं जनः सशब्दं करोतीत्यर्थः। अग्निफूत्कृतौ च। सुखेनैव धमेदग्निम्। इति दुर्गादासः ॥

ध्माकारः, पुं, (ध्मा अग्निसंयोगस्तं करोतीति। कृ+अण्।) लोहकारकः। इति हलायुधः ॥

ध्मामा, [न्] पुं, (ध्मा+"नामन्सीमन्निति।" उणां ४। १५०। इति मनिन्प्रत्ययेन निपातनात् साधुः। उज्ज्वलदत्तस्तु ध्मायतेर्मनिन् इत्युक्त्वा ध्मामन् इति शब्दमिच्छति।) परिमाणम्। आलोकः। ध्यानम्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

ध्यातं, त्रि, (ध्यै चिन्तने+क्तः।) चिन्तितम्। यथा, शान्तिशतके। ८।
"ध्यातं वित्तमहर्निशं न च पुनर्विष्णोः पदं शाश्व-[तम् ॥"

ध्यानं, क्ली, (ध्यै+भावे ल्युट्।) चिन्तनम्। (यथा, मनुः। १। १२।
"तस्मिन्नण्डे स भगवानुषित्वा परिवत्सरम्
स्वयमेवात्मनो ध्यानात्तदण्डमकरोद्द्विधा ॥")
धारणाविषये एकप्रत्ययसन्ततिः। इति हेमचन्द्रः। २। २३४॥ अद्वितीयवस्तुनि विच्छिद्य विच्छिद्यान्तरेन्द्रियवृत्तिप्रवाहः। इति वेदान्तसारः ॥ * ॥ यथा, विष्णुपुराणे।
"तद्रूपप्रत्ययैवैकसन्ततिश्चान्यनिस्पृहा।
तद्ध्यानं प्रथमैरङ्गैः षड्भिर्निष्पाद्यते नृप ! ॥"
अस्यार्थः। "तद्रूपस्य धारणासिद्धस्य वस्तुनः प्रत्यया यस्यां सन्ततौ सा एकावच्छिन्ना सन्ततिः। अन्यनिस्पृहा विषयान्तरेणाव्यवधीयमाना। विजातीयप्रत्ययान्तरितः सजातीयप्रत्ययप्रवाहो ध्यानमित्यर्थः। तच्च प्रथमैर्यमादिभिर्धारणान्तैः षड्भिरङ्गैर्निष्पाद्यते।" इति तट्टीका ॥ * ॥

श्रीकृष्ण उवाच।
"सर्व्वे देवाः प्राकृतिका यावन्तो मूर्त्तिधारिणः।
अहमात्मा नित्यदेही भक्तध्यानानुरोधतः ॥"
इति ब्रह्मवैवर्त्ते जन्मखण्डम् ॥

ब्रह्मचिन्ता। यथा, गारुड़े ४९ अध्याये।
"ब्रह्मात्मचिन्ता ध्यानं स्यात् धारणा मनसो धृतिः।
अहं ब्रह्मेत्यवस्थानं समाधिर्ब्रह्मणः स्थितिः ॥"
अपि च।
"प्राणायामैर्द्वादशभिर्यावत्कालो कृतो भवेत्।
यस्तावत्कालपर्य्यन्तं मनो ब्रह्मणि धारयेत्।
तस्यैव ब्रह्मणा प्रोक्तं ध्यानं द्वादश धारणाः ॥
द्वादशध्यानपर्य्यन्तं मनो ब्रह्मणि यो नरः।
तुष्टे तु स यतो युक्तः समाधिः सोऽभिधीयते ॥
ध्येयान्न चलते यस्य मनोऽभिध्यायतो भ्रमम्।
प्राप्यावधिकृतं कालं यावत् सा धारणा स्मृता ॥
ध्येये सक्तं मनो यस्य ध्येयमेवानुपश्यति।
नान्यं पदार्थं जानाति ध्यानमेतत् प्रकीर्त्तितम् ॥
ध्याने मनोनिश्चलतां याति ध्येयं विचिन्तयन्।
यत्तद्ध्यानं परं प्रोक्तं मुनिभिर्ध्यानचिन्तकैः ॥
ध्येयमेव हि सर्व्वत्र ध्याता तन्मयतां गतः।
पश्यति द्वैतरहितं समाधिः सोऽभिधीयते ॥"
इति गारुड़े २४० अध्यायः ॥

ध्यानयोगः, पुं, (ध्यानमेव योगः।) ध्यानरूपयोगः। यथा,—
"विविक्तसेवी लघ्वाशी यतवाक्कायमानसः।
ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः ॥"
इति श्रीभगवद्गीतायां १८ अध्यायः ॥

ध्यामं, क्ली, (ध्यायते पशुभिरिति। ध्यै चिन्तने+बाहुलकात् मक्।) दमनकहक्षः। गन्धतृणम्। (यथा, सुश्रुते। १। ३८।
"ध्यामकुङ्कुमकङ्कुष्ठवर्णाः पित्तकोपतः ॥")
मलिनत्वे, त्रि। इति मेदिनी। मे, १७॥

ध्यामकं, क्ली, (ध्याममिव प्रतिकृतिः। ध्याम+"इवे प्रतिकृतौ।" ५। ३। ९६। इति कन्।) रोहिषतृणम्। इति राजनिर्घण्टः॥ (यथा, सुश्रुते। १। ३८।
"एलातगरकुष्ठमांसीध्यामकत्वक्पत्रनागपुष्पप्रियङ्गुहरेणुका-व्याघ्रनख-शुक्तिचण्डास्थौणेयकश्रीवेष्टकचोचचोरकवालकगुग्गुलुसर्ज्जरसतुरुष्ककुन्दुरुकागुरुस्पृक्कोशीरभद्रदारुकुङ्कुमानि पुन्नागकेशरञ्चेति ॥")

ध्यामा, [न्] पुं, (ध्यै+"नामन्सीमन्निति।" उणां ४। १५०। इति मनिन्प्रत्ययेन निपातनात् साधुः।) परिमाणः। चिन्तायाम्, क्ली। इत्युणादिकोषः ॥

ध्येयः, त्रि, (ध्यायते इति। ध्यै+यत्।) ध्यातव्यः। ध्यानीयः। चिन्तनीयः। यथा,—
"ध्येयः सदा सवितृमण्डलमध्यवर्त्ती
नारायणः सरसिजासनसन्निविष्टः ॥"
इति श्रीनारायणध्यानम् ॥

ध्यै, चिन्तने। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-अनिट्।) ध्यायति विष्णुं वैष्णवः। इति दुर्गादासः ॥

ध्रज, गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) ध्रजति। इति दुर्गादासः ॥

ध्रण, इ गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्। इदित्।) इ, ध्रञ्जति। इति दुर्गादासः ॥

ध्रण, ध्वाने। इति कविकल्पद्रुमः। (भ्वां-परं-अकं-सेट्।) ध्रणति मृदङ्गः। इति दुर्गादासः ॥

ध्रस, क उत्क्षेपे। उञ्छे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) क, ध्रासयति। इति दुर्गादासः ॥

ध्रस, ग उ उञ्छे। इति कविकल्पद्रुमः॥ (क्र्यां-परं-सकं-सेट्। उदित्वात् क्त्वावेट्।) ग; ध्रस्नाति शस्यं दीनः। उ, ध्रसित्वा ध्रस्त्वा। इति दुर्गादासः ॥

ध्राक्ष, इ काङ्क्षे। घोररुते। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) रेफयुक्तः। घोररुतमिह तिरश्चामेव घोरशब्दः। इ, ध्राङ्क्षति पक्षी। नमध्यपाठेनैवेष्टसिद्धे अस्य इदनुबन्धो वैदेषकारणमेतदर्थः। इति दुर्गादासः ॥

ध्राख, ऋ शोषार्थे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) रेफयुक्तः। ऋ, अदध्राखत्। शोषार्थे शोषालमर्थयोः। इति दुर्गादासः ॥

ध्राघ, ङ ऋ शक्तौ। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सेट्।) ङ, ध्राघते। ऋ, अदध्राघत्। इति दुर्गादासः ॥

ध्राजिः, स्त्री, (ध्राजयतीति। ध्रज गतौ+णिच्+इन्।) वातालिः। इत्युणादिकोषः॥ घूरण वाताश इति भाषा॥ (ध्राजि+भावे इन्। गतिः। यथा, ऋग्वेदे। १०। १३६। २।
"मुनयो वातरशनाः पिशङ्गा वसते मला।
वातस्यानु ध्राजिं यन्ति यद्देवासो अविक्षत ॥"
"वातस्य वायोर्ध्राजिं गतिमनुयन्ति अनुगच्छन्ति ॥" इति तद्भाष्ये सायनः ॥)

ध्राड, ऋ ङ शीर्णौ। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) रेफयुक्तः। ऋ, अदध्राडत्। ङ, ध्राडते। शीर्णिः छिभेदः। इति दुर्गादासः ॥